# केन्द्रीयसंस्कृतविश्वविद्यालयः
## क.जे.सोमैयापरिसरः

विद्याविहारः, मुम्बई ७७

---

## प्रतिवेदनम्

## संस्कृतसप्ताहः

**(दिनाङ्कः** – ३१.०८.२०२३ तः ०८.०९.२०२३ पर्यन्तम्)

केन्द्रीयसंस्कृतविश्वविद्यालयस्य क.जे.सोमैयापरिसरे क.जे.सोमैयापरिसरः क.जे. सोमैयाकलावाणिज्यमहाविद्यालयः, आई.आई.टि.मुम्बई इति एतेषां संयुक्ततत्त्वावधाने संस्कृतसप्ताहस्य आयोजनं कृतम् । ३१.०८.२०२३ दिनाङ्के प्रातः ११.०० वादने सप्ताहस्य उद्घाटनकार्यक्रमः सम्पन्नः । अस्मिन् कार्यक्रमे अध्यक्षत्वे प्रो. बोधकुमारझामहोदयः मुख्यातिथित्वेन प्रो.प्रकाशचन्द्रमहोदयः, सारस्वतातिथित्वेन डॉ. एन.एन.जोशीमहोदयः, विशिष्टातिथित्वेन प्रो.मृणालभटमहोदया च उपस्थिताः आसन् कार्यक्रमस्य सञ्चालनं डॉ. संदीपजोशीमहोदयेन कृतम् ।

मध्याह्ने ३.०० वादने वाक्यार्थसभा आयोजिता । अस्यां सभायां ५ छात्राः व्याकरणशास्त्रे ३ छात्राः साहित्यशास्त्रे वाक्यार्थमुपस्थापितवन्तः । सभायाः आध्यक्ष्यं प्रो.बोधकुमारझामहोदेयन निरूढम् । सभायाः सञ्चालनं डॉ.संदीपजोशीमहोदयेन कृतम् ।

०१.०९.२०२३ दिनाङ्के क.जे. सोमैयाकलावाणिज्यमहाविद्यालये चित्रप्रदर्शिन्याः आयोजनं कृतम् । अस्मिन् कार्यक्रमे डॉ.डी.डी.मिश्रवर्यः, प्रो.बोधकुमारझावर्यः मुख्यातिथित्वेन उपस्थिताः आसन् ।

०२.०९.२०२३ दिनाङ्के आई.आई.टी.मुम्बई इत्यत्र व्याख्यानस्य आयोजनं कृतम् ।

०४.०९.२०२३ दिनाङ्के पूर्वाह्णे उच्चमाध्यमिकच्छात्राणां कृते संस्कृतगीतगायनस्पर्धा भाषणस्पर्धा च आयोजिता । यत्र केन्द्रीयविद्यालयकुलाबा १, केन्द्रीयविद्यालयभाण्डुप इति विद्यालयद्वयस्य छात्राः भागमगृह्णन् । संस्कृतगीतगायनस्पर्धायां कु.कीर्तना नायर प्रथमस्थानं, कु. सुहाना डेहरिया द्वितीयस्थानं, कु. सुनिधिदास तृतीयस्थानं प्राप्तवती । भाषणस्पर्धायां कु.लक्ष्मी सी.एस., ओजस्वी चिंचलीकर इति द्वे छात्रे क्रमशः प्रथमद्वितीयस्थानं च प्राप्तवत्यौ । भाषणस्पर्धायाः सञ्चालकत्वेन डॉ.फणिप्रसादमहोदयः आसीत् । तत्तत् विद्यालयस्य मार्दर्शिकाः अपि कार्यक्रमे उपस्थिताः आसन् ।

मध्याह्ने महाविद्यालयीयच्छात्राणां कृते प्रश्नोत्तरस्पर्धा वादविवादस्पर्धा च आयोजिता । प्रश्नोत्तरस्पर्धायां १२ गणेषु २४ छात्राः भागमगृह्णन् । प्रश्नोत्तरस्पर्धायाः सञ्चालनं

डॉ.सोमेशचन्द्रबहुगुणामहोदयेन कृतम् । वादविवादस्पर्धायां ११ छात्राः भागमगृह्णन् । वादविवादस्पर्धायाः सञ्चालकत्वे डॉ.दशरथभरासागरमहोदयेन कार्यं निरूढम् । एतासां स्पर्धानां सञ्चालकत्वेन परीक्षकत्वेन परिसरस्य विभिन्नविभागस्य अध्यापकाः दायित्वं निरूढवन्तः ।

०५.०९.२०२३ दिनाङ्के भारतीयज्ञानपरम्परामुपलक्ष्य प्रो.मन्दारभानुशेमहोदस्य व्याख्यानम् आयोजितम् । भारतीयज्ञानपरम्परायाः विषये संस्कृतज्ञानां कीदृशी भूमिका स्यात् इत्यस्मिन् सन्दर्भे महोदयेन उद्बोधनं कृतम् । अस्य कार्यक्रमस्य अध्यक्षत्वेन परिसरस्य निदेशकः प्रो.लक्ष्मीनिवासपाण्डेयमहोदयः आसन् । कार्यक्रमस्य स्वागतभाषणं डॉ.फणिप्रसादमहोदयेन सञ्चालनं डॉ.कुमारमहोदयेन धन्यवादज्ञापनं च डॉ.लक्ष्मणेन्द्रमहोदयेन कृतम् ।

मध्याह्ने ०३.०० वादने शोभायात्रायाः वीथिनाटकस्य आयोजनं कृतम् । यत्र शिक्षाशास्त्रविभागस्य छात्राः वीथिनाटकं प्रदर्शितवन्तः । परिसरस्य छात्राः अध्यापकाः कर्मचारिणश्च सोत्साहं शोभायात्रायां भागमावहन् ।

०८.०९.२०२३ दिनाङ्के समापनसमारोहः आयोजितः । अस्मिन् कार्यक्रमे संस्कृतक्षेत्रे कृतभूरिपरिश्रमः श्री.नीरजदाण्डेकरमहोदयः संस्कृतसेवाव्रती इत्याख्येन सम्मानेन सभाजितः । संस्कृतसप्ताहे आयोजितानां स्पर्धानां पुरस्कारवितरणं मान्यवराणां द्वारा जातम् । अस्य कार्यक्रमस्य मुख्यातिथित्वेन प्रो. रवीन्द्रमुळेमहोदयः, विशिष्टातिथित्वेन प्रो.सम्पदासन्तमहोदया उपस्थिता आसन् । कार्यक्रमस्य आध्यक्ष्यं प्रो.लक्ष्मीनिवासपाण्डेयमहोदयेन निरूढं कार्यक्रमस्य सञ्चालनं डॉ.कुमारमहोदयेन कृतम् ।

संस्कृतसप्ताहस्य संयोजकत्वे प्रो.बोधकुमारझावर्येण सहसंयोजकत्वेन डॉ.संदीपजोशीमहोदयेन कार्यं निरूढम् ।

*******

# कार्यक्रमस्य चित्राणि

उद्घाटनसमारोहः



वाक्यार्थसभा



स्पर्धा



व्याख्यानम्



शोभायात्रा




समापनसमारोहः



## पुरस्कारवितरणम्









**सयोजकः**

**प्रो.बोधकुमारझाः**
व्याकरणविभागाध्यक्षः,
क.जे.सोमैयापरिसरः, मुम्बई